CS (Main) Exam : ,2014

**C–DRN–N–L–UBOB**

# SANSKRIT

## Paper—II

## (Literature)

*Time Allowed : Three Hours*

*Maximum Marks : 250*

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **Two Sections**.

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly.

---

## SECTION—A

Q.1. **अधोनिर्दिष्टानां विषयाणां सोदाहरणं पर्यालोचनं क्रियताम्** (150 शब्दपरिमितं) : **10×5=50**

Q. 1(a) रघुवंशीयानां राज्ञां के के गुणाः स्पृहणीयाः प्रतिभान्ति। 10

Q. 1(b) किरातार्जुनीये निरूपिता राजनीतिः। 10

Q. 1(c) शिवराज्योदये घटनासंयोजनम्। 10

Q. 1(d) कादम्बर्याः कथायाः कानि मनोहराणि तत्वानि सन्ति। 10

Q. 1(e) दशकुमारचरिते वर्णितं सामाजिकजीवनस्य वैचित्र्यम्। 10

Q.2. **अधोनिर्दिष्टानां विषयाणां समीक्षा करणीया :**

Q. 2(a) ईशावास्योपनिषदः शान्तिपाठः। 20

Q. 2(b) अर्जुनविषादस्यापनोदनाय आत्मस्वरूपबोधस्यावश्यकता। 15

Q. 2(c) सुन्दरे किं न सुन्दरम्। 15

Q.3. **अधस्तात् निर्दिष्टानां विषयाणां सारगर्भिता समीक्षा कार्या :**

Q. 3(a) उदयनजीवने प्रियजनः कदाचित् कथंचित् विलुप्यते, किन्तु प्रेमराशिः न विलुप्यते। 20

Q. 3(b) उत्तररामचरिते भवभूतिनाविष्कृतः करुण रसः। 20

Q. 3(c) अभिज्ञानशाकुन्तले दुर्वाससः शापस्य प्रयोजनम्। 10

Q.4. **अधोनिर्दिष्टानां विषयाणां नागराक्षरैः संस्कृतभाषायां विवेचनं विधीयताम् :**

Q. 4(a) हर्षचरिते समुपलभ्यमाना भारतवर्षीया संस्कृतिः, इतिहासश्च। 20

Q. 4(b) मेघदूते विरहिणः यक्षस्यातृप्तः कामः सर्वत्र विलसति। 15

Q. 4(c) नीतिशतके वर्णितः सज्जनदुर्जनयोः भेदः। 15

## SECTION—B

Q.5. **अधोलिखितानां पद्यानां व्याख्या संस्कृतभाषायामेव नागराक्षरैरेव कर्तव्या (150 शब्दपरिमितं) :** **10×5=50**

Q. 5(a) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभाद् उद्बाहुरिव वामनः।। 10

Q. 5(b) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।। 10

Q. 5(c) पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वाऽपि हतद्विपानाम्।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः।। 10

Q. 5(d) वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्याम् अतैलपूराः सुरतप्रदीपाः।। 10

Q. 5(e) निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।। 10

Q.6. **अधोनिर्दिष्टानां पद्यानां व्याख्या संस्कृतभाषायामेव नागराक्षरैरेव विधेया :**

Q. 6(a) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।। 20

Q. 6(b) य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। 15

Q. 6(c) पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा।
सपङ्काम् अनलंकारां विपद्मामिव पद्मिनीम्।। 15

Q.7. **अधोलिखितानां तात्पर्यार्थं ससन्दर्भं प्रतिपाद्यताम् :**

Q. 7(a) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलव-दुर्विदग्धं ब्रह्मापि नरं न रञ्जयति।। 20

Q. 7(b) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।। 15

Q. 7(c) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि खड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटात् मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्य्यम् इत्येतानि सहपासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेवोद्गता।। 15

Q.8. **अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या :**

Q. 8(a) किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।। 20

Q. 8(b) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।। 15

Q. 8(c) म्लानस्य जीवकुसुमस्य विकासनानि
संतर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि।। 15